# Tellakula Jalayya Polisetty Somasundaram College

(Managed by Vasavi Vidyanidhi Committee)

Guntur - 522 006, Andhra Pradesh, India

Affiliated to Acharya Nagarjuna University :: Aided College by Govt. of A.P.

Estd. 1971

## Certificate

This is to certify that Prof. / Dr. / ~~Mr.~~ / ~~Ms.~~ A. Sudhama Vamsi - Mateusri

Oriental college ........ was a Resourse Person / Participated / Presented a paper

........ in the One Day **NATIONAL SEMINAR** on

"Sahityam - Samajahitam" / "సాహిత్యం - సమాజహితం" / "साहित्य-समाजहित" / "साहित्यम्-समाजहितम्"

Organised by Department of Telugu, Hindi & Sanskrit on 19th February, 2020 by IQAC, T. J. P. S. College, Guntur.

IQAC Co-ordinator

Principal

ISSN No. : 2456-4702 - RNI No. APTEL/2003/12253
UGC CARE - Journal - Arts & Humanities, Sl. No. : 35

# साहित्यम् - समाजहितम्

Dr. ASAVADI SUDHAMA VAMSI
M.A., M.Phil., PhD., NET IN SANSKRIT
Senior Lecturer in Sanskrit
MATRUSRI ORIENTAL COLLEGE
JILLILLAMUDI, BAPATLA
GUNTUR – 522113
asavadisudhama@gmail.com, cell - 9440087823.

---

***"भारतस्य प्रतिष्टे द्वे संस्कृतम् संस्कृति स्तथा*** " इत्यभियुक्तोक्ति माधारीकृत्य संस्कृतभाषा, भारतीयसंस्कृतिः अत्यन्ता प्राचीना इति निश्चप्रचम् वचः। देवता व्यवहार योग्यत्वात् संस्कृतभाषा देवभाषा समाधेयम्। ***"यतोहि वाण्येका समलं ङ्करोति पुरुषं या संस्कृता धार्यते"*** ***"वाक् वैदोग्धीं --- धेनुर्वाग् अस्मान् उपशुष्टतैतु"*** इत्यादि प्रामाण्यवचनानि संस्कृतभाषायाः, संस्कृतेश्च अविनाभाव सम्बन्धं ख्यापयन्ति।

वैदिककालादारभ्य आधुनिक कालपर्यन्तं संस्कृतभाषा गङ्गादि पुण्यजीवनदीव आसंसाराम् अस्मान् पुणति। संस्कृतसाहित्ये मानवता संपादनाय, संस्थापनाय च महर्षयः लोकानुग्रहकाक्षिणः यत्नः अकार्षुः। एतादृश महत्वपूर्णायाः संस्कृतेः उज्जीवनाय, परिरक्षणाय बद्धपरिकरास्तौ महाभागौ नित्यस्मरणीयौ भवति व्यासवाल्मीकादौ।

<u>आचार्यः</u>

**"आचारं ग्राहयति आञ्चिनोति अर्थान् बुद्धिमिति वा इति आचार्यः "** **"धर्मान् आचिनोति शिक्षते इति आचार्यः"।** **"यस्मात्पुरुषात् अयं शिष्यः धर्मानाचिनोति शिक्षते स आचार्यः "** इति आचार्यपरिभाषा आपस्तम्बहिरण्यकेशिधर्मसूत्रयोः दृश्यते- ***यस्माद्धर्मानाचिनोति स आचार्यः*** (आप.1.1.1.14 हि. 26.1.13) इति।

श्रावणपौर्णमास्याम् उपाकरणादारभ्य पौषपौर्णमस्याम् उत्सर्जनपर्यन्तं यः वेदमध्यापयति तादृशः आचार्यः लोमवापनं, मांसं, श्राद्धभोजनं, मैथुनञ्च वर्जयेत्। ऋतुकाले एव जायामभिगच्छेत्। अध्यापकः आचार्यः ऋतावपि वर्षासु शरदि च मैथुनं वर्जयेत्।

ISSN No. : 2456-4702 - RNI No. APTEL/2003/12253
UGC CARE - Journal - Arts & Humanities, Sl. No. : 35

येन प्रकारेण अध्यापनेन शिष्यस्य वेदपाठस्य तदर्थस्य चावगमः भवति तेनैव प्रकारेण शिष्येभ्यो विद्या सम्प्रदेया। एवं भूते विद्यासम्प्रदाने सः अवहितः स्यात्। शयानस्सन् अध्यापनं न कुर्यात् दिवा वा रात्रौ वा।

**सर्वप्राणिनां समं प्राधान्यम् अथवा अत्मवत्सर्वभूतानि**

***सर्वप्राणिनां समं प्राधान्यम् न केवलं मानवार्थमिति स्मृतिकृद्वदति*** (कौण्डिन्यस्मृतिः 265 श्लो)। अर्थात् प्राणिनां सर्वेषां समं प्राधान्यं देयमिति। किञ्च सर्वेषु प्राणिषु दयां कुर्यादिति, ***स एव सनातनो धर्म इति स्मृतिकारः वदति*** (कौण्डिन्यस्मृतिः 266श्लो)। तथा च जगदिदं ब्रह्ममयमिति प्रस्तौति-

***जग द्ब्रह्ममयं सर्व को नीचः को नु वोत्तमः।***

***त्यक्त्वा द्वेषमसूयां च याप्यतां जीवनं सुखम्।।*** (कौण्डिन्यस्मृतिः 266 श्लो)

जगति कस्यापि उत्तमत्वं नीचत्वं वा नास्तीति, द्वेषासूये च विहाय सर्वसमत्वभावनया जीवेदिति अत्रोक्तः धर्मः रागाजश्रेयरो एव। ततः ***विष्णुः प्राणिषु सर्वेषु गावमन्ध्वं च कञ्चन*** (कौण्डिन्यस्मृतिः 498श्लो) इति प्रस्तौति। सर्वेषु प्राणिषु ब्रह्मणः, विष्णोर्वा सत्तां पश्यन् कस्यापि हानिरवमानं वा मा कुर्यादिति धर्मः समाजहितायैवोक्तः। कथं वा सर्वत्र परब्रह्मणः दर्शनमित्याकांक्षायां स्वयं समादधाति स्मृतिकारः- ***जीवाः शिवमयाः सर्वे सर्वं शिवमयं जगत्।***

***शिवं पश्यत सर्वत्र शतरुद्रीयवागियम्।।***

***श्वानः शिवः श्वपतयः शिवः कमारकाः शिवः।***

***स्मरैतां शतरुद्रोक्तिं त्यज भेदं शिवं भज।।***

***स्तौति चेत्त्वां जनः कश्चित् शिवः स्तौतीति चिन्त्यताम्।***

***यदि निन्दति कश्चित्त्वां शिवो निन्दति, मा क्रुधः।।***

(कौण्डिन्यस्मृतिः267 to269श्लो)

स्मृतिकृदुक्तानुसारं सर्वत्र ब्रह्मणमेव पश्यतः प्राणिनः कस्मै अपि हानिं नोपकल्पयन्ति। एवं विधासामाजिकश्रेऽयोत्र लक्षितः।

**समाजसेवा कुर्यात्**

समाजसेवापि सर्वैः कार्येति स्मृतिकृदुद्घोषयति। तया उत्तमं पदं लप्स्यते इति सूचयति-

*वापीकूपतटाकादिनिर्माणैर्वृक्षरोपणैः।*

*निरतान्नप्रदानैश्च लभ्यते पदमुत्तमम्।।*

*देवालयमठादीनां निर्माणैर्जीर्णजल्पनैः।*

*निःस्वार्थसेवनया ऽऽर्तानां लभ्यते पदमुत्तमम्।।*(कौण्डिन्यस्मृतिः 359,360श्लो)

*पङ्गवन्धबधिरादीनामनाथानामचेतसाम्।*

*साहय्यं सर्वथा कार्यं सर्वैः, श्रेयो ऽर्थिभिर्जनैः।।* (कौण्डिन्यस्मृतिः 351श्लो)

एवंविधसमाजसेवया सामाजिकश्रेयोऽधिगम्यते।

**धर्मपालकः भवेत्**

सर्वः धर्मपालकः भवेदित्युद्घोषति कौण्डिन्यस्मृतिः। स धर्मः यथादेशं, यथाकालं च भवेत्-

*यथादेशं यथाकालं यथाशक्ति यथाविधि।*

*पालनेन स्वधर्मस्य लभ्यते पदमुत्तमम्।।* (कौण्डिन्यस्मृतिः)

किञ्च असक्तस्सन्नेव अर्थकामौ निषेवेतेति धर्मैकतत्परो भवेदिति सूचयति

*अर्थकामौ निषेवेत न तत्रासक्तधीर्भवेत्।*

*सदा धर्मैकचित्तः स्यादेष धर्मः सनातनः।।* (कौण्डिन्यस्मृतिः 137श्लो)

आसक्त्यैव अर्थकामनिषेवणं सर्वानर्थानां मूलमिति कृत्वा अनासक्त्यैव तौ सेवेतेत्युपदिश्य सर्वे धार्मिकाः भवेयुरित्यसूचयत्। यदीमं धर्मं पालयेयुस्तर्हि विश्वश्रेयः सिध्यत्येव।

**देशपित्रादिभक्तिः स्यात्**

समाजहिमभिलक्ष्यैव देशपितृभक्तिविहिनंजनं जीवच्छवमभिप्रैति-

*स्वदेशे यस्य नो भक्तिः न पित्रोर्नापि वा गुरौ।*

*न स्वामिन्यन्नदे भक्तिः न जीवच्छव उच्यते।।*

*मम देशो मम जना धर्मो मे संस्कृतिर्मम।*

*इति चिन्तैव नो यस्य स जीवच्छव उच्यते।।*

(कौण्डिन्यस्मृतिः 322,324श्लो)

ISSN No. : 2456-4702 - RNI No. APTEL/2003/12253 UGC CARE - Journal - Arts & Humanities, Sl. No. : 35

एवं सर्वेषां ***मम देशोऽयम्, मम जना एते*** इत्याकारकानुरागः भवेदित्युपदिशति कौण्डिन्यस्मृतिः। तेन च सर्वं जनं आत्मीयं द्रष्टुं शक्यते। ततः समाजकल्याणं सिध्यत्येव। किञ्च स्वधर्मे निन्द्यमाने ये तूष्णीं तिष्ठन्ति, तान् स्मृतिकारो न सहते-

***धर्मे स्वे निन्द्यमानेऽपि दुष्टैरन्यमताश्रयैः।***

***तूष्णीमेव तु यश्चास्ते स जीवच्छव उच्यते।।*** (कौण्डिन्यस्मृतिः 325श्लो)

तन्मते परमतदूषणं नैवकुर्यात्- ***श्रद्धास्तु ते तवमते मास्तु द्वेषो मतान्तरे।।*** (कौण्डिन्यस्मृतिः 444श्लो) इति। एवं विना परमतदूषणं भिन्नभिन्नधर्मावलम्बिनः जनाः सुखं जीवेरन्निति कौण्डिन्यस्मृत्युपदेशः।

**"मातृदेवो भव, पितृदेवो भव"**

***देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि। तानि त्वयोपास्यानि। नो इतराणि।।*** *(तैत्तिरीयोपनिषद् शिक्षावल्ली 11 अनुवाकः)*

***मातृदेवो भव, पितृदेवो भव*** इत्यादि उपनिषद्वाक्य प्रस्तावः अधुनातनकाले येन प्रस्तूयते तं बहवः जनाः न्यूनतया पश्यन्ति। यतः य एतानि उपनिषद्वाक्यानि वदति, सः तन्नानुसरतीति मत्वा, अन्ये तं न विश्वसन्ति। तस्य वाचि गाम्भीर्यमेव, न क्रियानुसरणमिति जनानां अभिप्रायः भवेत्।

अद्य समाजे बहवः वृद्धाश्रमाः, अनाधाश्रमाः इत्यादयः बहवः उदारैः मानवैः कतिपयैः प्रचाल्यन्ते। अत्र कारणं वृद्धजनानां पोषणार्थं धनाभावो वा सहायक भृत्याभावो वा न कारणं, किन्तु मातृपित्रादिवृद्धपोषणे, सेवने आदरणे, तत् पुत्राणां ममकाराभावः एव नान्यत्। परं तत्पुत्राः स्वकार्ये सम्लग्नः ***"समयाभावकारणात् पित्रादीनां संरक्षणं कर्तुमशक्ता "*** इति असत्यवचनानि प्रकटयन्ति। एवमेव कालेगच्छति भूमौ सर्वत्र वृद्धाश्रमाः, अनाधाश्रमाः एव दृश्यमानाः भवेयुः। इतः परमपि ***"विश्वस्य अनाधशरणालयगोलमिति नाम भवेत्, न भूगोलमिति"***।

अतः पूर्वोक्त भयंङ्कर दोष निवृत्तये सनातन काले एव उपनिषदः मातृदेवो भव, पितृदेवो भव इत्यादि शासन वाक्यानि सरलतया बोधयन्ति। तद्वारा मानवस्य जीवनं सुखतरं, सुखमयं वृद्धिं च प्राप्नोति। एवं सर्वे लोकाः सुखिनः भविष्यन्ति।

अतः सर्वैः मानवैः पूर्वोक्त सुखजीवनाय स्वकर्तव्यमिति मत्वा मातृपितृतोषणं, पोषणं, आदरणं च विधिवत् कर्तव्यमेव। अनेन समाजे सर्वेषां गौरवं वर्धते। तादृश समाज निर्माणार्थमेव उपनिषदादिषु एतादृश विषयाः प्रस्तुताः। एते सर्वदा सर्वैः स्मर्तव्या एवेति मत्वा क्रियाशीलकाः पुरुषाः केचित् अनुदिन दृश्यमान प्रदेशेषु बहिरङ्गप्रदेशेषु लघुवाक्य रूपेण शिलाफलकेषु प्रकाशयन्ति। तत्र तत्र प्रमुखस्थलेषु, विश्वविद्यालयेषु तेषां तेषां समाजसेवोपयोगाय प्रमुखमुद्रादिचिह्नेषु ( logo's) मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, विद्ययाऽमृतमश्नुते, असतो मा सद्गमया, तमसो मा ज्योतिर्गमया, मृत्यो र्मा अमृतंगमय एतादृश उपदेश सम्बद्धवाक्यानि उपनिबद्ध्यन्ते।

सर्वाण्येतानि उपनिषद्वाक्यानि बहुलार्थकानीति मत्वा शक्तिवञ्चनां विहाय, सन्तः प्रचारं कुर्वन्ति। अतः उपनिषदः सर्वकाल सर्वावस्थासु सर्वेषां समाजहिताय, सामाजिकोपदेशाय उपयुज्यन्ते।

**"अन्नं न निद्यात्, अन्नं न परिचक्षीत"**

*अन्नं न निन्द्यात्। तद्व्रतम्। प्राणो वा अन्नम्। शरीरमन्नादम्। प्राणे शरीरं प्रतिष्ठितम्। शरीरे प्राणः प्रतिष्ठितः। तदेतन्नमन्ने प्रतिष्ठितम्। स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतिष्ठिति। अन्नवानन्नादो भवति। महान्यभवति प्रजया पशुभिर्ब्रह्मवर्चसेन। महान्कीर्या।।*

***(तैत्तिरीयोपनिषद् भृगुवल्ली अध्यायः vii)***

***"प्रतिदिनं अन्नस्य खादनेनैव अस्माकं शक्तिः चैतन्यं वा उत्पद्यते नान्यथा "*** इति निश्चप्रचं वचः। सहजतया अन्नपदस्य यत्किमपि धान्यसम्बद्धं अर्थं स्वीक्रियते। नैतत् समीचीनम्। यतः हानिं विना शरीरस्य शक्तिं यदाहारं प्रददति तत् सर्वमपि अन्नपदेन उच्यते।

यस्यान्नस्य खादनेन ब्रह्मविज्ञानमुत्पद्यते तादृशं अन्नं न तिरस्कुर्यात्। आसृष्टेः जीवं धारयन्तः क्रिमिकीटकादि प्रभृति मानवपर्यन्तं सर्वस्य जीवनं अन्नादेव भवति। शरीरपोषणानन्तरमेव खलु समस्तं ज्ञानविज्ञानब्रह्मज्ञानात्मज्ञानादयः प्राप्तुं शक्यन्ते सर्वैः नान्यथा। यतः शरीरं आद्यं धर्मसाधनं खलु। तदर्थं येनकेन समुचितेन रूपेण स्थितं अन्नं खादनीयम्। एवं अन्नमाधारीकृत्य जीवनं यापयन्मानवः वेदाः वेदान्ताः तदितरं जीवितसाफल्य विषयाः सर्वाः विषयपरिज्ञानसम्बन्धिनः स्वधीशक्त्या सम्पाद्य जीवितं सार्धकं कर्तुं समर्थो भवति। अमुमेव अंशं प्रधानीकृत्य तैत्तिरीयोपनिषदि अन्नस्य वैशिष्ट्यं, प्रामुख्यं च सविस्तरं उपदिशति।

**ISSN No. : 2456-4702 - RNI No. APTEL/2003/12253**
UGC CARE - Journal - Arts & Humanities, Sl. No. : 35

***"अन्नं न परिचक्षीत"*** इत्यस्मिन्मन्त्रे परिचक्षीत इति पदस्य ***"विसर्जयेत्"*** इत्यर्थं भावयेत्। विसर्जनं नाम खादितुं अयुक्तम्। यथा तावत् पर्यान्तं अन्नं व्यर्थं न कुर्यात् इत्यर्थः स्वीकरणीयः। अत एव अवशिष्टं अन्नं समीचीनदशायां एव अन्येभ्यः दातव्यमिति ***न निन्दयात्*** इति पदस्यार्थः। नाम स्वयं भोजनं परिसमाप्य अविशिष्टमन्नं ***"तक्षण एव अन्येभ्यः दातव्यं"*** इत्यर्थः ज्ञायते। एतदेव विषयं ***"दैवांशसम्भूतया अर्कपुराधीश्वर्या जननन्या अनसूया मात्रा यत् सम्प्रातं तत् स्वयं तृप्त्या स्वीकृत्य शिष्टं आदरेण स्वयं प्रेम्णा ददातु "*** इत्युक्तम्। एतद् वाक्यं अन्नं न परिचक्षीतेति वेदान्त वाक्यस्य अत्यन्तजनसामान्य भाषया सरलतया तया देव्या प्रकटिता।

अनेन ज्ञायते यत् समाजे यः को ऽपि स्वाभीष्टं अन्नं खादित्वा शिष्टं व्यर्थं अकृत्वा स्व सन्निहिताय अन्यस्मै आर्ततया प्रेम्ना प्रदातव्यमिति। एवमेव स्वस्वगृहेषु उत्सवादिषु कार्य कर्तारः वा अवशिष्टं सत्वरमेव अन्येभ्यः योग्येभ्यः अन्विष्य प्रदातव्यमिति सामाजिकस्पृहां वर्धयतीति च वक्तुं शक्यते।

उपयुक्त ग्रन्थाः

1. कौण्डिण्यस्मृतिः
2. तैत्तिरीयोपनिषद्
3. संस्कृत साहित्य चरित्र
4. आपस्तम्ब धर्मसूत्रम्
5. हिरण्यकेशि धर्मसूत्रम्
6. उपनिषद् सुधा